श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

सरलकविराघवाचार्य विरचितं

# ॥ श्रीदक्षिणशेषाचलेश श्रीनिवास भगवन्मङ्गळम् ॥

## (श्रीप्रसन्नवेङ्कटेश मङ्गळम्)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीदक्षिणशेषाचलेश श्रीनिवास भगवन्मङ्गळम् ॥

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम्।
श्रीवेङ्कट निवासाय श्रीनिवासाय मङ्गलम् ॥ 1 ॥

श्रीमद्दक्षिणशेषाद्रि शिरस्पदविहारिणे।
प्रसन्नवेङ्कटेशाय श्रीनिवासाय मङ्गलम् ॥ 2 ॥

सर्वमङ्गलरूपाय सर्वमङ्गलमूर्तये।
सर्वमङ्गलदायास्तु श्रीनिवासाय मङ्गलम् ॥ 3 ॥

सर्वभूतशरण्याय सर्वप्रणतबन्धवे।
सर्वकर्मभिरर्च्याय श्रीनिवासाय मङ्गलम् ॥ 4 ॥

सर्वान्तरात्मने सर्ववपुषे सर्वशक्तये।
सर्वज्ञाय ब्रह्मणेऽस्तु श्रीनिवासाय मङ्गलम् ॥ 5 ॥

छत्रत्फणालिभोगीन्द्रभोगान्तस्स्थानमीयुषे।
चतुर्भुजाय भद्राय श्रीनिवासाय मङ्गलम् ॥ 6 ॥

सर्व वेदैकवेद्याय सर्ववेदान्विजानते।
सर्वलोकनिवासाय श्रीनिवासाय मङ्गलम् ॥ 7 ॥

आदिकोलेन चक्रेण वामदक्षिणपार्श्वयोः।
भास्वराय श्रियः पत्ये श्रीनिवासाय मङ्गलम् ॥ 8 ॥

वामदक्षिणपाणिभ्यां पाञ्चजन्यसुदर्शनौ।
मुदासदादधानाय श्रीनिवासाय मङ्गलम् ॥ 9 ॥

नमेदं मत्पदं भक्त सुतरस्स्याद्भवस्तव।
इति सूचयते दोर्भ्यां श्रीनिवासाय मङ्गलम्॥ 10 ॥

सतां भक्त्याप्रपत्त्या वा प्रसन्नाय दयालवे।
अपवर्गप्रदायास्तु श्रीनिवासाय मङ्गलम्॥ 11 ॥

अस्त्रभूषणतापन्नसर्वतत्त्वाय मायिने।
सर्वेश्वरेश्वरायास्तु श्रीनिवासाय मङ्गलम्॥ 12 ॥

सर्वश्रुत्यभिनूताय सर्वश्रेयोविधायिने।
श्रियः कान्ताय पूर्णाय श्रीनिवासाय मङ्गलम्॥ 13 ॥

चतुर्मुखादिभिः सर्वैः पूज्यमानाय निर्जरैः।
भक्तानां सुलभायास्तु श्रीनिवासाय मङ्गलम्॥ 14 ॥

रमानित्यविहाराढ्यविशालशुभवक्षसे।
विश्वकल्याणरूपाय श्रीनिवासाय मङ्गलम्॥ 15 ॥

उपत्यकाधित्यकयोर्दक्षिणस्याहिभूभृतः।
द्विधा हनुमतार्च्याय श्रीनिवासाय मङ्गलम्॥ 16 ॥

धर्मस्थापनसद्रक्षादुष्कृद्ध्वंसफलान् बहून्।
भावानाश्रयते दिव्यान् श्रीनिवासाय मङ्गलम्॥ 17 ॥

मङ्गळाशासनपरैस्सुरैस्सर्वैनरैरपि।
आचार्यैश्चार्चितायान्तु श्रीनिवासाय मङ्गलम्॥ 18 ॥

श्रीसीतारामसद्भक्त हृदयांबुजवासिने।
तद्भक्ताभीष्टदायास्तु श्रीनिवासाय मङ्गलम्॥ 19 ॥

वात्स्यराघवसूर्युक्तं श्रीनिवासस्य मङ्गलम्।
शुभदं यः पठेन्नित्यं स भवेत्सर्वमङ्गलः॥ 20॥

॥ इति श्रीदक्षिणशेषाचलेश श्रीनिवास भगवन्मङ्गळं समाप्तम्॥